तथा च रुद्रयामले।
"श्मशाने भैरवीतारारच्छिन्नमस्तासु भैरवे।
मञ्जघोषे तथा रौद्रे पञ्चाङ्गं नेष्यते बुधैः॥
उपविद्यासु सर्व्वासु षट्कर्म्मादिषु साधने।
नात्र दीक्षाद्यपेक्षास्ति नात्राङ्गादिप्रपूजनम्॥"
तन्त्रसारे।
"उपविद्यासु सर्व्वासु तथा प्रयोगसाधने।
दीक्षां विनैव कर्त्तव्य उपदेशः सदैव हि॥"*॥
अथ सङ्क्षेपदीक्षा।
"सुहूर्त्ते सर्व्वतोभद्रे नवं कुम्भं निधाय च।
सोदकं गन्धपुष्पाभ्यामर्च्चितं वस्त्रसंयुतम्॥
सर्व्वौषधिनवरत्नपञ्चपल्लवसंयुतम्।
ततो देवार्च्चनं कृत्वा जुहुनेदष्टोत्तरं शतम्॥"
पञ्चपल्लवमिति। पनसाम्राश्वत्थवटवकुलानि। तथा च वाशिष्ठे।
"पनसाम्रं तथाश्वत्थं वटं वकुलमेव च।
पञ्चपल्लवमित्युक्तं मुनिभिस्तन्त्रवेदिभिः॥"*॥
नवरत्नमिति।
"मुक्तामाणिक्यवैदूर्य्यगोमेदान् वज्रविद्रुमौ।
पद्मरागं मरकतं नीलञ्चेति यथाक्रमात्॥"*॥
निबन्धे।
"शिष्यं स्वलङ्कृतं वेद्यामुपाविशुपवेशयेत्।
मन्त्रितं प्रोक्षणीतोयैः शान्तिकुम्भजलैस्तथा॥
मूलमन्त्रेणाष्टशतं मन्त्रितैरभिषेचयेत्॥"
अष्टशतम् अष्टोत्तरशतम्।
"अथ सम्पादयेन्मन्त्रं हस्तं शिरसि धारयन्।
समोऽस्त्वित्यक्षतान् दद्यात् ततः शिष्योऽर्च्चयेद्गुरुम्॥"

यद्वा दीक्षान्तरम्। शङ्खमभ्यर्च्च्य साक्षतं तदम्बुनादष्टवारं मूलेन शिरसि करं निधाय अष्टौ वारान् कर्णे जपेत्। तथा च।
"तत्राप्यशक्तः कश्चिच्चेदब्जमभ्यर्च्च्य साक्षतम्।
तदम्बुनाभिषिच्याष्टवारं मूलेन केवलम्॥
निधायाष्टौ जपेत् कर्णे उपदेशे त्वयं विधिः॥"
इति सङ्क्षेपदीक्षा॥
उपदेशान्तरमाह। विश्वसारे।
"चन्द्रसूर्य्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये।
मन्त्रमात्रप्रकथनमुपदेशः स उच्यते॥"
विश्वसारे।
"महादीक्षा तथा दीक्षा उपदेशस्ततः परम्।
युगे युगे च कर्त्तव्या उपदेशः कलौ युगे॥"
इति कृष्णानन्दकृततन्त्रसारः।

दीक्षान्तः, पुं, (दीक्षायाः प्रधानयज्ञस्य अन्तः अन्तोपलक्षितो यज्ञः।) अवभृथः। इत्यमरः। २।७।२७॥ "प्रधानयागो दीक्षा तस्याः अन्तः समापको योऽपरो यज्ञो न्यूनत्वादिदोषशान्त्यर्थं प्रधानयागस्य पूरणार्थं प्रतिज्ञार्थं क्रियते सोऽवभृथ उच्यते। अवहीनं बिभर्त्ति पोषयतीति नाम्नीति थक्। यज्ञावशेषे स्नाने चावभृथः। यज्ञावशेषे स्नानं यत् तदेवावभृथं विदुरिति त्रिकाण्डशेषः॥ यज्ञान्ते तमवभृथाभिषेकपूतमति रघुः।" इत्यमरटीकायां भरतः॥

दीक्षितः, त्रि, (दीक्ष+कर्त्तरि क्तः। यद्वा, दीक्षा सञ्जाता अस्येति। तारकादित्वात् इतच्।) सोमपानविशिष्टयागकर्त्ता। यथा। स सोमवति दीक्षितः। इत्यमरः। २।७।८॥ "स व्रती सोमपानवति अध्वरे यजमानः सन् दीक्षित उच्यते। अन्यत्राप्युपचारात्। दीक्ष मौण्ड्येज्योपनयननियमव्रतादेशेषु क्तः दीक्षाशब्दादितो वा।" इति तट्टीकायां भरतः॥ *॥ गुरुमुखाद्गृहीतमन्त्रः। यथा,—
"अदीक्षिता ये कुर्व्वन्ति जपपूजादिकाः क्रियाः।
न भवन्ति प्रिये! तेषां शिलायामुप्तबीजवत्॥
देवि! दीक्षाविहीनस्य न सिद्धिर्न च सद्गतिः।
तस्मात् सर्व्वप्रयत्नेन गुरुणा दीक्षितो भवेत्॥
अदीक्षितोऽपि मरणे रौरवं नरकं व्रजेत्॥"
इति तन्त्रसारः॥ *॥
काम्पिल्लनगरस्थयज्ञदत्तनामकब्राह्मणः। यथा,
"आसीत् काम्पिल्लनगरे सोमयाजिकुलोद्भवः।
दीक्षितो यज्ञदत्ताख्यो यज्ञविद्याविशारदः॥
वेदवेदाङ्गवेदार्थवेदोक्ताचारचञ्चुरः।
राजमान्यो बहुधनो वदान्यः कीर्त्तिभाजनः॥
अग्निशुश्रूषणरतो वेदाध्ययनतत्परः॥"
इति स्कान्दे काशीखण्डे गन्धवत्यलकावर्णनं नाम १३ अध्यायः॥*॥ (स्वीकृतदीक्षः। यथा, महाभारते। २। ७३। १।
"ततः पराजिताः पार्थां वनवासाय दीक्षिताः।
अजिनान्युत्तरीयाणि जगृहुश्च यथाक्रमम्॥")

दीक्षिता, [ऋ] पुं, (दीक्ष+"सुददीपदीक्षश्च।" ३।२।१५३। इति युचं वाधित्वा शीलार्थे तृच्।) सोमयाजी। इति केचित्॥ दीक्षाविशिष्टः। दीक्षधातोः कर्त्तरि तृण्प्रत्ययेन निष्पन्नः॥

दीक्षितायनी, स्त्री, (दीक्षितः स्वनामख्यातब्राह्मण एव अयनं गतिर्यस्याः। स्त्रियां टित्वात् ङीप्।) काम्पिल्लनगरस्थदीक्षितनामकब्राह्मणपत्नी। यथा, काशीखण्डे १३ अध्याये।
"महापतिव्रतां सम्यक् पत्नीं प्रोवाच तामथ।
दीक्षितायनि! कुत्रासि क्व ते गुणनिधिः सुतः॥
अथ तिष्ठतु किन्तेन क्व सा मम शुभोर्म्मिका।
अङ्गोद्वर्त्तनकाले या त्वया मेऽङ्गुलिका हृता॥
नवरत्नमयीं शीघ्रं तामानीय प्रयच्छ मे।
इति श्रुत्वाथ तद्वाक्यं भीता सा दीक्षितायनी॥"

दीदिविः, पुं क्ली, (दिव्यन्त्यनेनेति। दिव+"दिवो द्वे दीर्घश्चाभ्यासस्य।" उणां। ४। ५५। इति क्विन् अभ्यासस्य दीर्घश्च।) अन्नम्। इत्यमरः। २। ६। ४८॥ (दिव्यतीति क्विन्।) वृहस्पतौ, पुं। इति मेदिनी। वे, ३७॥ (स्वर्गे भक्ते च। इत्युणादिवृत्तौ उज्ज्वलदत्तः॥)

दीदिविः, त्रि, (दिव्+क्विन्।) उदितः। इति शब्दरत्नावली॥ (पुनपुनर्द्योतकः। यथा, ऋग्वेदे। १। १। ८॥
"राजन्तमध्वराणां गोपामृतस्य दीदिविम्॥"
"दीदिविं पौनःपुन्येन भृशं वा द्योतकम्।"
इति तद्भाष्ये सायनः॥)

दीधितिः, स्त्री, (दीधीते दीप्यते इति। दीधी+संज्ञायां क्तिन्। इट्। "अग्रहादीनाम्।" इति वार्त्तिकवचनात् "यीवर्णयोर्दीधीवेव्योः।" १।४।५३। इति अन्त्यस्य लोपः।) किरणः। इत्यमरः। १। ४। ३३॥ (यथा, रघुः। ३। २२।
"पुपोष वृद्धिं हरिदश्वदीधिते-
रनुप्रवेशादिव बालचन्द्रमाः॥")

दीधी, ङ ङ लु च देवने। दीप्तौ। इति कविकल्पद्रुमः॥ (अदां-आत्मं-अकं-सेट्।) दीर्घमध्यः। ङ वैदिकः। ङ लु, दीधीते। च, अदीधयुः। बहुलं छन्दसीति परस्मैपदे अनुसृसिद्धेरिति अन् उस् गुरुस्य अमिति गुणः। इति दुर्गादासः॥

दीनं, क्ली, (दीयते स्म इति। दी+क्तः। ततः निष्ठातस्य नः।) तगरपुष्पम्। इति राजनिर्घण्टः। (अस्य पर्य्यायो यथा,—
"कालानुसारिवा वक्रं तगरं कुटिलं शठम्।
महोरगं नतं जिह्मं दीनं तगरपादिकम्॥"
इति वैद्यकरत्नमालायाम्॥)

दीनः, त्रि, (दीयते स्मेति। ओ दीङ् क्षये+"गत्यर्थाकर्म्मकेति।" ३। ४। ७२। इति कर्त्तरि क्तः। "ओदितश्च।" ८। २। ४५। इति निष्ठातस्य नः। यद्वा, दी+"इण्सिञ्जिदीङुष्यविभ्यो नक्।" उणां। ३। २। इति नक्।) दरिद्रः। इत्यमरः। ३। १। ४६॥ (यथा, मनौ। ६। २३८।
"चरेयुः पृथिवीं दीनाः सर्व्वधर्म्मवहिष्कृताः॥")
भीतः। इति मेदिनी। ने, २१॥ (दुःखितः। यथा, रघुः। २। २५।
"सप्त व्यतीयुस्त्रिगुणानि तस्य
दिनानि दीनोद्धरणोचितस्य॥")

दीना, स्त्री, (दीन+टाप्। सततं भीतभीतेव दृश्यत्वात् तथात्वम्।) मूषिकस्त्री। इति मेदिनी। ने, १०॥

दीनारः, पुं, (दीयते इति। दी+"दीङो नुट् च।" उणां। ३। १४०। इति आरन् नुट् च।) स्वर्णभूषा। मुद्रा। इत्युणादिकोषः॥ (यथा, पञ्चतन्त्रे ३। १३६।
"अथ प्रातर्यावदेत्य पश्यति तावद्दीनारमेकं शरावे दृष्टवान्॥") निष्कपरिमाणम्। इत्यमरः। ३। ३। १४॥ सुवर्णकर्षद्वयम्। इति तट्टीकासारसुन्दरी॥ सम्यग्व्यवहारार्थं मानवस्तु। लौकिकः। द्वात्रिंशद्रत्तिकापरिमितं काञ्चनम्। इति भरतः॥

दीप, ई ङ य ऋ दीपने। इति कविकल्पद्रुमः॥ (दिवां-आत्मं-अकं-सेट्।) दीपनमुज्ज्वलीभावः। ई, दीप्तः। ङ य, दीप्यते निशि चन्द्रमाः। ऋ, अदीदिपत् अदिदीपत्। इति दुर्गादासः॥

दीपः, पुं, (दीप्यते दीपयति वा स्वं परञ्चेति। दीप् दीपि वा+"इगुपधज्ञाप्रीकिरः कः।" ३। १। १३५। इति कः।) वर्त्तिस्थज्वलदग्निशिखा। तत्पर्य्यायः। प्रदीपः २ स्नेहाशः ३ दीपकः ४ कज्जलध्वजः ५ शिखातरुः ६ गृहमणिः ७